# Raja Indradyutikritam Krishnanarayana Stotram

# રાજા ઇન્દ્રદ્યુતિકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Raja Indradyutikritam Krishnanarayana Stotram

File name : rAjAindradyutikRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 71/20-29||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# રાજા ઇન્દ્રદ્યુતિકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

તદ્ભક્ત્યાઽનુગ્રહં કુર્વન્ સાક્ષાત્ કૃષ્ણનારાયણઃ ।
પ્રાદુરાસીત્ પીતવાસાઃ કિશોરશ્ચ જગન્મયઃ ॥ ૨૦॥

ઇન્દ્રદ્યુતિર્હરિં વીક્ષ્ય નેમે તુષ્ટાવ તં પ્રભુમ્ ।
કૃષ્ણનારાયણ વિષ્ણો પુરુષોત્તમ કેશવ ॥ ૨૧॥

અનાદિશ્રીહરે સ્વામિન્ હૃષીકેશ ચ તે નમઃ ।
વિશ્વાત્મન્ સૃષ્ટિકૃત્કૃષ્ણાનન્તશક્તે ચ તે નમઃ ॥ ૨૨॥

નિર્ગુણાનન્તદિવ્યાનાં ગુણાનાં પૂર્ણમૂર્તિક ।
જ્ઞાનગમ્ય કૃપાલભ્ય પુરુષોત્તમ તે નમઃ ॥ ૨૩॥

અનન્તમૂર્તયે તુભ્યં નમોઽસ્ત્વાનન્દરૂપિણે ।
નમસ્તે પરમેશાય બ્રહ્મણે પરમાત્મને ॥ ૨૪॥

ત્વં પિતા સર્વભૂતાનાં માતા બન્ધુઃ સુહૃત્સખા ।
ત્વમક્ષરં પરં ધામ ચિન્માત્રં વ્યોમ વૈ બૃહત્ ॥ ૨૫॥

સર્વસ્યાધારમવ્યક્તમનન્તં તમસઃ પરમ્ ।
ત્વાં પશ્યન્તિ પરાત્માનં જ્ઞાનદીપેન સેવકાઃ ॥ ૨૬॥

પ્રપદ્યે તં ભવેદ્રૂપં સચ્ચિદાનન્દવિગ્રહમ્ ।
યત્રાસ્તે ભગવાઁસ્તદ્વૈ શ્રીહરેઃ પરમં પદમ્ ॥ ૨૭॥

ત્વમેવ નયસિ શ્રીમત્કૃષ્ણનારાયણપ્રભો ।
જ્ઞાનં દેહિ પદં દેહિ ત્વન્માયા મા પ્રદેહિ મે ॥ ૨૮॥

ઇત્યુક્ત્વા પ્રપતન્તં તં પાદયોઃ સ્વકરેણ હ ।
પસ્પર્શ પ્રહસન્ કૃષ્ણનારાયણઃ પુનઃ પુનઃ ॥ ૨૯॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૭૧-અધ્યાયાન્તર્ગતં
રાજા ઇન્દ્રદ્યુતિકૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૭૧/૨૦-૨૯॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 71/20-29..

Proofread by PSA Easwaran

*Raja Indradyutikritam Krishnanarayana Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*